শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্॥

## দশক - ২৬

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্ৰীঃ
শ্ৰীমতে কৃষ্ণায পরব্ৰহ্মণে নমঃ
শ্ৰীমতে রামানুজায নমঃ

# ॥শ্ৰীমন্নারাযণীযম্ ॥

## দশক - ২৬

*গজেন্দ্ৰমোক্ষৱর্ণনম্*

ইন্দ্ৰদ্যুম্নঃ পাণ্ড্যখণ্ডাধিরাজ-
স্তৱদভক্তাত্মা চন্দনাদ্ৰৌ কদাচিত্।
ত্বতসেৱাযাং মগ্নধীরালুলোকে
নৈৱাগস্ত্যং প্ৰাপ্তমাতিথ্যকামম্॥ ১ ॥

কুম্ভোদভূতিঃ সম্ভৃতক্ৰোধভারঃ
স্তব্ধাত্মা ত্বং হস্তিভূযং ভজেতি।
শপ্তৱাথৈনং প্ৰত্যগাত্ সোপি লেভে
হস্তীন্দ্ৰত্বং ত্বতস্মৃতিৱ্যক্তিধন্যম্॥ ২ ॥

দুগ্ধাম্ভোধের্মধ্যভাজি ত্ৰিকূটে
ক্ৰীডঞ্ছৈলে যূথপোযং ৱশাভিঃ।
সর্ৱান্ জন্তূনত্যৱর্তিষ্ট শক্ত্যা
ত্বদভক্তানাং কুত্ৰ নোতকর্ষলাভঃ॥ ৩ ॥

স্বেন স্থেম্না দিৱ্যদেশত্বশক্ত্যা
সোযং খেদানপ্ৰজানন্ কদাচিত্।
শৈলপ্ৰান্তে ঘর্মতান্তঃ সরস্যাং
যূথৈসসার্ধং ত্বতপ্ৰণুন্নোভিরেমে॥ ৪ ॥

হূহূস্তাৱদ্ দেৱলস্যাপি শাপাত
গ্ৰাহীভূতস্তজ্জলে ৱর্তমানঃ।
জগ্ৰাহৈনং হস্তিনং পাদদেশে
শান্ত্যর্থং হি শ্ৰান্তিদোসি স্বকানাম্॥ ৫ ॥

www.prapatti.com

ত্বতসেৱাযা বৈভৱাত্ দুৰ্নিরোধং
যুদধ্যন্তং তং ৱতসরাণাং সহস্রম্।
প্রাপ্তে কালে ত্বতপদৈকাগ্র্যসিদধ্যৈ
নক্রাক্রান্তং হস্তিৱর্যং ৱ্যধাস্তৱম্॥ ৬ ॥

আর্তিৱ্যক্তপ্রাক্তনজ্ঞানভক্তিঃ
শুণ্ডোতক্ষিপ্তৈঃ পুণ্ডরীকৈঃ সমর্চন্।
পূর্ৱাভ্যস্তং নির্ৱিশেষাত্মনিষ্ঠং
স্তোত্র শ্রেষ্ঠং সোন্ৱগাদীত্ পরাত্মন্॥ ৭ ॥

শ্রুত্বা স্তোত্রং নির্গুণস্থং সমস্তং
ব্রহ্মেশাদ্যৈর্নাহমিত্যপ্রযাতে।
সর্ৱাত্মা ত্বং ভূরিকারুণ্যৱেগাত
তার্ক্ষ্যারূঢঃ প্রেক্ষিতোভূঃ পুরস্তাত্॥ ৮ ॥

হস্তীন্দ্রং তং হস্তপদ্মেন ধৃত্বা
চক্রেণ ত্বং নক্রৱর্যং ৱ্যদারীঃ।
গন্ধর্ৱেস্মিন্ মুক্তশাপে স হস্তী
ত্বতসারূপ্যং প্রাপ্য দেদীপ্যতে স্ম॥ ৯ ॥

এতদৱৃত্তং ত্বাং চ মাং চ প্রগে যো
গাযেতসোযং ভূযসে শ্রেযসে স্যাত্।
ইত্যুক্ত্বৈনং তেন সার্ধং গতস্ত্বং
ধিষ্ণ্যং ৱিষ্ণো পাহি ৱাতালযেশ॥ ১০ ॥

**********



www.prapatti.com